"भल्लातकसहस्राद्धं जलद्रोणे विपाचयेत् । अष्टभागावशेषञ्च कषायमवतारयेत् । घृतप्रस्थं समादाय कल्कानीमानि दापयेत् । त्र्यूषणं पिप्पलीमूलं चित्रको हस्तिपिप्पली ॥ हिङ्गुचव्याजमोदा च पञ्चैव लवणानि च । द्वौ क्षारौ हवुषा चैव दद्यादर्द्धपलोन्मितान् ॥ दधिकाञ्जिकशुक्तानि स्नेहमात्रासमानि च । आर्द्रकं सरसञ्चैव शोभाञ्जनरसन्तथा ॥ तत् सर्व्वमेकतः कृत्वा शनैर्मृद्वग्निना पचेत् । एतदग्निघृतं नाम मन्दाग्नीनां प्रशस्यते" इति च ।

**अग्निचयन** पु० अग्निश्चीयते आधीयते अनेन चि—करणे ल्युट् ६त० । अग्न्याधानसाधने मन्त्रभेदे, भावे ल्युट् ६त० । अग्न्याधाने न० ।

**अग्निचित्** त्रि० अग्निं चितवान् चि-भूतार्थे क्विप् । मन्त्रपूर्व्वककृतवह्निस्थापने अग्निहोत्रिणि । भावे क्विप् । अग्न्याधाने ।

**अग्निचित्या** स्त्री अग्नेश्चित्या चि-भावे क्यप् नि० स्त्रीत्वम् । अग्निचयने अग्न्याधाने "उपविशेदग्निपुच्छस्य साग्निचित्यायामिति" गृह्यम् । "चित्याग्निचित्ये" चेति पा० ।

**अग्निचित्वत्** त्रि० अग्निचित् अग्निचयनमस्त्यस्मिन् मतुप् मस्य वः तान्तत्वान्न पदत्वम् । अग्निचयनयुक्तेषु यज्ञेषु "अध्वरेष्वग्निचित्वत्स्विति" भट्टिः स्त्रियां ङीप् ।

**अग्निज** पु० अग्नये अग्न्युद्दीपनाय जायते सेवनात् प्रभवति जन-ड ४त० । अग्निजारवृक्षे । अग्नेर्जायते जन-ड ५त० । स्वर्णे न० । कार्त्तिकेये पु० । तत्कथाऽग्निकुमारशब्दे द्रष्टव्या । अग्निजातमात्रे त्रि० "अग्निजा ओषधिजा महीनामिति श्रुति" "अग्नीश्वरस्य भक्तानां न भयं विद्युदग्निजमिति" काशीखण्डः ।

**अग्निजन्मन्** पु० अग्नेर्जन्माऽस्य ५त० । कार्त्तिकेये तद्विवरणम् अग्निकुमारशब्देऽनुसन्धेयम् । स्वर्णे न० ।

**अग्निजार** पु० जारयति जॄ-णिच्-कर्त्तरि अण् अग्निरिव जारः । स्वनामख्याते वृक्षे, औषधभेदे च । रस्य लत्वे अग्निजालोऽप्यत्र ।

**अग्निजिह्व** त्रि० अग्निर्जिह्वास्वादसाधनं यस्य । अग्निमुखे देवे "ये अग्निजिह्वा उत वा यजत्रा" श्रुतिः अग्निरेव जिह्वाऽस्य । वराहमूर्त्तिधारणकाले विष्णोर्वराहरूपे "अग्निजिह्वो दर्भरोमेति वराहरूपवर्णने विष्णुः । ६त० । अग्निजिह्वायां स्त्री सा च सप्तविधा तासां नामानि यथा "करालो धूमिनी श्वेता लोहिता नीललोहिता सुवर्णा पद्मरागा च जिह्वाः सप्त विभावसोरिति" कथं तासामग्निमुखे स्थितिस्तच्च अग्निशब्दे तद्ध्याने दर्शितम् अग्नेर्जिह्वेव शिखाऽस्याः ब० । लाङ्गलीवृक्षे स्त्री ।

**अग्निज्वाला** स्त्री अग्नेर्ज्वालेव शिखाऽस्याः । गजपिप्पलीवृक्षे । (विषलाङ्गला) ६त० । अग्निशिखायाम् ।

**अग्नितप्** त्रि० अग्निना तप्यते तप—क्विप् । अग्निना तपस्याकारके "परावीरास एतनमर्य्यास भद्रजानयः । अग्नितपो यथा सथेति, श्रुतिः ।

**अग्नितपस्** त्रि० अग्निभिः सम्मुखस्थसूर्य्यसहितचतुर्दिक्स्थपावकैस्तप्यते तप—असुन् ३त० । "ग्रीष्मे पञ्चाग्निमध्यस्थ" इति स्मृत्युक्ततीव्रतपस्याकारके । तपतीति तपाः अग्निरिव तपाः । अग्निसदृशोष्णस्पर्शवति । "यदा बलमस्य पीयतोजसुं भेद्बृहस्पतिरग्नितपोभिरर्कैरिति" श्रुतिः ।

**अग्नितेजस्** त्रि० अग्नेरिव तेजोऽस्य । अग्नितुल्यतेजस्के पदार्थे "अग्निलोकेऽग्नितेजस, इति काशी० । "विष्णोः क्रमोऽसि सपत्नहा पृथिवीसंश्रितो अग्नितेजा इति" श्रुतिः । ६त० । अग्नेस्तेजसि न० ।

**अग्नित्रय** न० त्र्यवयवं त्रयं त्रि+अयट् ६त० । यथाविधानेन कृताधाने अग्नित्रितये । पित्रादीन्युपक्रम्य "एतएव त्रयोलोका एतएव त्रयोऽग्नयः । पिता गार्हपत्याग्निर्माता दक्षिणाग्निः, आचार्य्य आवहनीय इति" विष्णूक्ते गार्हपत्यदक्षिणाग्न्यावहवनीयवह्नित्रयरूपे पित्रादौ च । अस्य वा स्त्रीत्वे ङीप् अग्नित्रयीत्यप्यत्र ।

**अग्निद** त्रि० अग्निं गृहादौ दाहार्थं ददाति दा-क । गृहादौ दाहार्थं वह्निदायके आततायिभेदे "अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारी च षडेते आततायिन इति" स्मृतिः ।

**अग्निदग्ध** त्रि० अग्निना अन्त्येष्टिविधानेन दग्धः दह—कर्म्मणि क्त । शास्त्रविधानेन संस्कृताग्निना कृतदाहे "अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले ममेति, वायु पु० । अग्निना कृतदाहे पदार्थमात्रे त्रि० । "अग्निदग्धाविमौ पक्षाविति" रामा० ।

**अग्निदमनी** स्त्री अग्निर्दम्यते अनया दम-णिच्-करणे ल्युट् ६त० ङीप् । कण्टकारिकातः क्षुद्रे-कण्टकावृते गुच्छस्थक्षुद्रफलवति (गणियारी) इति ख्याते क्षुपभेदे ।

**अग्निदातृ** स्त्री० अग्निं विधानेन ददाति दा-तृच् । अन्त्येष्टिविधानेन दाहकारके "यश्चाग्निदाता प्रेतस्य पिण्डं दद्यात् स एव हि" इति स्मृतिः । स्त्रियां ङीप् ।